© 2017 IJSRST | Volume 3 | Issue 6 | Print ISSN : 2395-6011 | Online ISSN : 2395-602X

# परीक्षिन्नाटकचक्रे प्रस्तावक



**सुधा मिश्रा**
शोधच्छात्रा, राष्ट्रिय संस्कृत संस्थान
गंगानाथ झा परिसर, इलाहाबाद

'अवस्थानुकृतिर्नाट्यम्' इति। तत्र वस्तुवर्णनीयपदार्थस्तस्मात्तादृशात् पूर्वं सर्वप्रथमं सूत्रधारादिनटाः नाट्यशालायां सशव्यमाना ये विघ्नाः नटादिदुरदृष्टजन्योपद्रवास्तदुप–शान्तये यत् प्रकुर्वन्ति स्वसमाजनियमात् कविनिर्देशात् सामाजिकादेशाद्वा आचरन्ति स पूर्वरङ्गपदेन व्यवह्रियते। अतः पूर्वरङ्गो नाट्यशाला तत्स्थं कर्मापि पूर्वरङ्गपदेन व्यवह्रियते। अतः पूर्वरङ्गो नाम रङ्गोपद्रवनिवारकः नान्दीपाठगीतवादित्रादिनानाविधाङ्ग–विशेषो नाट्यादावनुष्ठेयः कर्मविशेषः। तदुक्तम्–

**सशपतिः सश सभ्या गायका वादका अपि ।**
**नटी नटश्च मोदन्ते यत्रान्योन्यानुरञ्जनात् ।।**
**अतो रङ्गः इति ज्ञेयः पूर्ववत्स प्रकल्प्यते ।**
**तस्मादयं पूर्वरङ्ग इति विद्वद्भिरुच्यते ।।**

यद्यपि अस्य पूर्वरङ्गस्य प्रत्याहारादिकानि बहूनि द्वाविंशतिसंख्याकानि अङ्गानि सन्ति। तथापि विघ्नोपशान्तये नान्दी अवश्यं कर्तव्या। नाट्यप्रदीपे नान्दीपद–व्युत्पत्तिश्चेत्थमुक्ताकृ

**नन्दन्ति काव्यानि कवीन्द्रवर्गाः**
**कुशीलक पारिषदाश्च सन्तः ।**
**यस्मादलं सज्जनसिन्धुहंसी**
**तस्मादियं सा कथितेह नान्दी1 ।।** इति।

एतेन नान्द्याः अवश्यविधानं प्रतिपाद्यते, तत्र का नाम नान्दीति कथं च तादृशं नामेत्याकाङ्क्षायां त क्षणमाह साहित्यदर्पणेकृ

IJSRST184943 | Received : 03 July 2017 | Accepted : 25 July 2017 | July-August-2017 [(3) 6 : 779-782]

**आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।**
**देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।।**
**शङ्खमाङ्गल्यचन्द्राब्जकोककैरवशंसिनी ।**
**पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत2 ।।**

देवद्विजनृपादीनाम् आदिपदात् गुर्वादीनां च आशीराशंसा तत्प्रतिपादकेन वचनेन आत्मनः परस्य वा तादृशाशीर्वचनेन संयुक्ता स्तुतिः गुणकीर्तनं यस्मात्प्रवर्तते सभसत्सु नटै श्राव्यते। अतस्तद्वचनमेव तत्सम्बन्धान्नान्दीति संज्ञिता। स्तुतिः इत्यत्र 'नित्यम्' इति पाठे स्तुतिरित्यधारार्यम्। तथा च नाटकादिषु सा नित्यमवश्यं प्रयुज्यते, न त्वस्या कादाचित्कत्वस्थितिः। नन्दयति स्तुत्या देवादीनानन्दयतीति नान्दी। सा च नान्दी मङ्गल्यं मङ्गलद्योतकम्, शङ्खम्, चन्द्रम्, अब्जं कमलम्, कोकं चक्रवाकम्, कैरवम् श्वेतकमलम्, वा शंसति कयाचिदप्यभिधाद्या वृत्या प्रत्यायतीति सा तादृशी भवेत्। तथा सा द्वादशभिः पदैः सुबन्ततिङन्ताद्यन्यतमैः उत वा अष्टभिः पदैर्युक्ता भवेत्

नित्यप्रयुज्या नान्दी पण्डित ओगेटीपरीक्षितशर्मणा स्वकीयनाटकचक्रस्य सर्वेषु नाटकेषु अनुरूपा नान्दीप्रयुक्ता। यथा प्रथमे नाटके कचदेवयानीये नाटके नान्दीकृ

**विद्यापरिसमाप्त्यर्थं नाट्यसर्वकलानिधिम् ।**
**संसारदुःखदातारं कविं वन्देऽसुराधिपम्1 ।।**

अस्यां नान्द्या नाट्यानुरूपं कविमसुरगुरुं शुक्राचार्यं वन्दते। गुरुपुत्रः कचाख्यः ज्ञानार्जनाय शुक्राचार्यस्य निकेतनं गच्छति। तत्रैव नाटकस्य सर्वा घटना वर्णिताऽस्ति। अतः नाटकानुरूपं नान्दी वर्तते। एवमेव श्रावणे नाटके श्रावणमासं स्तौति यतो हि श्रावणमासस्य घटना वर्णिताऽस्ति। एवमेव पारीक्षिते विष्णुं, नर्तनशालानाटके शिवाम्, वज्रं वज्रेण भिद्यते इत्यस्मिन् नाटके शान्तिमयं स्वशवम्, प्रबोधने कृष्णम्, गुरुदक्षिणानाटके महर्षीन्, उत्तरगोग्रहणे गोसम्पदं स्तौति। एवं परीक्षिन्नाटके क्वचिद् नान्दी स्तुतिरूपा, क्वचिद् आशीरूपा, क्वचिच्च मङ्गलस्वरूपा विद्यते। एवं सर्वेषु चतुर्दशपौराणिकनाटकेषु षडैतिहासिकनाटकेषु अनुरूपां नान्दीं प्रयुज्य नाट्यशास्त्रस्य परम्परां पालितवान्। परन्तु सामाजिकेषु सप्तसु नाटकेषु नान्द्यभवः दृश्यते्

एवं नान्दीरूपं पूर्वरङ्गं विधाय सूत्रधारः नाटकस्य वस्तु बीजादिकं सूचयेत्। सूत्रं धरतीति सूत्रधारः–
**नाटकीयकथासूत्रं प्रथमं येन सूच्यते ।**
**रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते1 ।।**

यथोक्तं साहित्यदर्पणेकृ

**पूर्वरङ्गं विधायैव सूत्रधारो निवर्तते ।**
**प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत्ततः ।।**
**दिव्यमर्त्यें स तद्रूपो मिश्रमन्यतरस्तयोः ।**
**सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा2 ।।**

सः स्थापकः शरतीं वृत्तिम् आश्रितः अवलम्बमानः सन् काव्याथों काव्यवृत्तान्तः। तत्सूचकैः मधुरैः श्लोकैः नाट्यालयेऽधःस्थं सामाजिकगणं प्रसाद्य रूपकस्य तत्कवेश्च आख्यां संज्ञां तथा तस्य कवेगोंत्रं, आदिपदात्तदीयनिवासस्थानादिकं च प्रायेण वसन्तादिकम् ऋतुं च कथयेत्। यथोक्तं साहित्यदर्पणे–

**रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।**
**रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्तयेत्1 ।।**

पण्डित ओगेटीपरीक्षित्शर्मा स्वकीये नाटकचक्रे परम्परामिमां प्रायः निशल्यते। यथा कचदेवयानीये नाटके नान्द्यन्ते सूत्रधारः नेपथ्याश्मिुखमवलोक्य नटीमाह्वयति सूचयति चङ्गगीर्वाणान्ध्रशषाप्रवीणेन परीक्षितशर्मणा प्रणीते परीक्षिन्नाटकचक्रे विराजमानं कचदेवयानीयं नाम नाटकम्। नाटकविषये सूचयति–

**सङ्गीतरम्या कचदेवयानी**
**विशति श्रृङ्गाररसप्रपूर्णा ।**
**नटीनटानां सुलशश्निेया**
**पद्यश्रियाशूषितसन्निवेशैः2 ।।**

नाटकस्य स्थलमपि सूचयतिङ्गआयें इतः पश्य; गुरुपुत्रः कचाख्यः शुक्राचार्यनिकेतनं गच्छति। एहि आवां गच्छावः (द्वावपि गच्छतः)

एतदेव नाटकीयशषायां प्रस्तावना इति कथ्यते। प्रस्तावयति प्रकृत्याश्नियविषयं सूचयति या सा प्रस्तावना विज्ञेया। यथोक्तं साहित्यदर्पणेकृ

**नटो विदूषको वापि पारिपार्श्विक एव वा ।**
**सूत्रधारेण सहिताः संलापः यत्र कुर्वते ।।**
**चित्रैः वाक्यैः स्वकायोंत्थैः प्रस्तुताक्षेपिशिर्मिथः ।**
**आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि स्य1।।**

नटः विदूषकः पारिपार्श्विकः नटी वा एते सूत्रधारेण युक्ताः सन्तः स्वकार्योत्थैः प्रकृतं दृश्यकाव्यविषयम् आक्षिपन्ति सूचयन्तीति तैस्तथोक्तैः चित्रैर्वाक्यैर्बहुविधैर्वाक्यैः यत्र मिथः अन्योन्यं संलापं कुर्वते तत्तु आमुखं विज्ञेयम्। प्रकृताश्नियस्य मुखे प्रारम्भे विधेयत्वाद् आमुखमिति कथ्यते। तदेव प्रस्तावनाऽपि कथ्यते। परीक्षिन्नाटकचक्रस्य सवेंषु पौराणिकनाटकेषु नान्द्यन्ते सूत्रधारः प्रविश्य नट्या सहितः सं ापं करोति विषयवस्तु च सूचयति। ऐतिहासिकेषु नाटकेषु विविधपात्रैः इयं प्रस्तावना निशलिता। सामाजिके पानशालानाटके व्यवस्थापकः प्रविश्य नाटकीयवस्तु सूचयति। एवमेव प्रेमपरीक्षानाटकेऽपि। एवं सर्वेषु नाटकेषु प्रस्तावना निशलिता परीक्षितशर्मणा्

**सन्दर्भ**


[1]. द्रष्टव्यम्ङ्सहित्यदर्पणस्य लक्ष्मीटीका, पृ. 326य

[2]. साहित्यदर्पणे, 6.24–25;

[3]. कचदेवयानीयम्, पृ. 1

[4]. द्रष्टव्यम्ङ्सहित्यदर्पणस्य लक्ष्मीटीका, पृ. 331

[5]. साहित्यदर्पणे, 6.26–27

[6]. साहित्यदर्पणे, 6.28

[7]. कचदेवयानीयम्, पृ. 1

[8]. साहित्यदर्पणे, 6.31–31